# 26 - षड्विंश दशकम्
# गजेन्द्र मोक्षम्

इन्द्रद्युम्नः पाण्ड्य खण्डाधिराजः त्वद् भक्तात्मा चन्दनाद्रौ कदाचित् ।
त्वत् सेवायां मग्नधी रालुलोके नैवागस्त्यं प्राप्त मातिथ्य कामम् ॥॥26-1॥

कुम्भोद्भूतिस् संभृत क्रोधभारः स्तब्धात्मा त्वं हस्तिभूयं भजेति ।
शप्त्वाऽथैनं प्रत्यगात् सोऽपि लेभे हस्तीन्द्रत्वं त्वत्स्मृति व्यक्तिधन्यम्॥॥26-2॥

दुग्धाम्भोधेर् मध्य भाजि त्रिकूटे क्रीडञ्छैले यूथपोऽयं वशाभिः ।
सर्वान् जन्तू नत्यवर्तिष्ट शक्त्या त्वत् भक्तानां कुत्र नोत्कर्ष लाभः॥॥26-3॥

स्वेन स्थेम्ना दिव्य देशत्व शक्त्या सोऽयं खेदा नप्रजानन् कदाचित् ।
शैल प्रान्ते घर्म तान्तस् सरस्यां यूथैस् सार्धं त्वत् प्रणुन्नोऽभिरेमे ॥॥26-4॥

हूहूस् तावत् देवल स्यापि शापात् ग्राही भूतस् तज्जले वर्तमानः ।
जग्राहैनं हस्तिनं पाददेशे शान्त्यर्थं हि श्रान्तिदोऽसि स्वकानाम् ॥॥26-5॥

त्वत् सेवाया वैभवात् दुर्निरोधं युध्यन्तं तं वत्सराणां सहस्रम् ।
प्राप्ते काले त्वत्पदैकाग्र्य सिध्यै नक्राक्रान्तं हस्तिवर्यं व्यधास्त्वम्॥26-6॥

आर्ति व्यक्त प्राक्तनज्ञान भक्तिः शुण्डोत् क्षिप्तैः पुण्डरीकैस् समर्चन् ।
पूर्वाभ्यस्तं निर्विशेषात्म निष्ठं स्तोत्रं श्रेष्ठं सोऽन्वगादीत् परात्मन् ॥॥26-7॥

श्रुत्वा स्तोत्रं निर्गुणस्थं समस्तं ब्रह्मेशाद्यैर् नाहमित्य प्रयाते ।
सर्वात्मा त्वं भूरि कारुण्य वेगात् तार्क्ष्या रूढः प्रेक्षितोऽभूः पुरस्तात्॥॥26-8॥

हस्तीन्द्रं तं हस्त पद्मेन धृत्वा चक्रेण त्वं नक्रवर्यं व्यदारीः ।
गन्धर्वेऽस्मिन् मुक्तशापे स हस्ती त्वत्सारूप्यं प्राप्य देदीप्यते स्म ॥॥26-9॥

एतत् वृत्तं त्वां च मां च प्रगे यो गायेत् सोऽयं भूयसे श्रेयसे स्यात् ।
इत्युक्त्वैनं तेन सार्धं गतस् त्वं धिष्ण्यं विष्णो पाहि वातालयेश ॥॥26-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥